SN – 137

**III Semester B.B.A. Examination, November/December 2017**
**(Freshers + Repeaters) (CBCS)**
**(2015 – 16 and Onwards)**
**LANGUAGE SANSKRIT – III**
**Champu Ramayanam (Balakanda)**
**Grammar and Translation**

Time : 3 Hours　　　　　　　　　　　　　　　　　　　　Max. Marks : 70

***Instructions :*** *1) Answer in* ***Sanskrit / Kannada / English.***
*2) Answer Q. No.* ***I, VI*** *and* ***VII*** *in* ***Sanskrit only.***

I. समीचीनम् उत्तरं चिनुत ।　　　　　　　　　　　　　　　　(10×1=10)

ಸರಿಯಾದ ಉತ್ತರವನ್ನು ಆರಿಸಿ ಬರೆಯಿರಿ.

Select the correct answer.

1) नलचम्पू काव्यस्य कर्ता क: ?
अ) अनन्तभट्ट:　　आ) त्रिविक्रम भट्ट:　　इ) भोजराज:　　ई) वेंकटाध्वरि:

2) नरा: पितृणां तर्पणं कै: विदधाति ?
अ) गङ्गाजलै:　　आ) तुङ्गाजलै　　इ) यमुनाजलै:　　ई) सिन्धुजलै:

3) क्रौञ्चमिथुनादेकं क: वधं कृतवान् ?
अ) तस्कर:　　आ) अधम:　　इ) निषाद:　　ई) वनचर:

4) वाल्मीकि: कौ परिग्रह्य रामायणं अपाठयत् ?
अ) सूर्यचन्द्रौ　　आ) हरिहरौ　　इ) इन्द्रवरुणौ　　ई) लवकुशौ

5) दशरथस्य मन्त्री क: ?
अ) सुमति:　　आ) सुमन्त्र:　　इ) कौशिक:　　ई) केकय:

6) अश्वमेधाध्वरं दशरथ कुत्र विदधात् ?
अ) गङ्गातटे　　आ) सिन्धुतटे　　इ) नर्मदातटे　　ई) सरयूतटे

7) महाबलिवैभवं नामावशेषं क: कृतवान् ?
अ) नारायण:　　आ) देवेन्द्र:　　इ) महेश्वर:　　ई) ब्रह्मा

8) रजनीचरराजधानी का ?
अ) अयोध्या　　आ) काञ्ची　　इ) लङ्का　　ई) विशाला

9) दशरथाय अमृतमयपायसं कः प्रायच्छत् ?
अ) वसिष्ठः आ) वामदेवः इ) विभाण्डकः ई) वैश्वानरः

10) कैकेयीसुतः कः ?
अ) रामः आ) लक्ष्मणः इ) भरतः ई) शत्रुघ्नः

II. **द्वयोः** प्रश्नयोः उत्तरं लिखत । (2×10=20)

**ಎರಡು** ಪ್ರಶ್ನೆಗಳನ್ನು ಉತ್ತರಿಸಿ.

Answer **any two** of the following.

1) चम्पूकाव्यस्य उगम–विकासमधिकृत्य प्रबन्धं रचयत ।
ಚಂಪೂ–ಕಾವ್ಯದ ಉಗಮ–ವಿಕಾಸವನ್ನು ಕುರಿತು ಪ್ರಬಂಧವನ್ನು ರಚಿಸಿ.
Write an essay on the origin and development of Champu Kavya.

2) विष्णुं प्रति देवगणस्य निवेदनं विवृणुत ।
ವಿಷ್ಣುವನ್ನು ಕುರಿತು ದೇವಗಣವು ಮಾಡಿದ ನಿವೇದನೆಯನ್ನು ವಿವರಿಸಿ.
Describe the request to Lord Vishnu made by Gods.

3) ताटकवध प्रसङ्गं विवृणुत ।
ತಾಟಕಾವಧ ಪ್ರಸಂಗವನ್ನು ವಿವರಿಸಿ.
Describe the destruction of Thataka.

III. a) **द्वयोः** श्लोकयोः अनुवादं कृत्वा विवृणुत । (2×4=8)
**ಎರಡು** ಶ್ಲೋಕಗಳನ್ನು ಅನುವಾದಿಸಿ ವಿವರಿಸಿರಿ.
Translate and explain **any two** Shlokas.

1) वाल्मीकिगीतरघुपुङ्गवकीर्तिलेशैः
तृप्तिं करोमि कथमप्यधुना बुधानाम्।
गङ्गाजलैर्भुवि भगीरथयत्नलब्धैः
किं तर्पणं न विदधाति नरः पितॄणाम् ।।

2) अथ सरसिजयोनेराज्ञया रामवृत्तं
करबदरसमानं प्रेक्ष्य दृष्ट्या प्रतीच्या ।
शुभमतनुत काव्यं स्वादु रामायणाख्यं
मधुमयफणितीनां मार्गदर्शी महर्षिः ।।

3) नारायणाय नलिनायतलोचनाय
नामावशेषितमहाबलिवैभवाय ।
नानाचराचरविधायकजन्मदेश –
नाभीपुटाय पुरुषाय नमः परस्मै ॥

4) अम्भोजसम्भवममुं बहुभिस्तपोभिः
आराधयन्वरमवाप परैर्दुरापम् ।
तस्मादशेष भुवनं निजशासनस्य
लक्षीकरोति रजनीचरचक्रवर्ती ॥

b) गद्यभागम् अनुवदत । (1×4=4)

ಗದ್ಯಭಾಗವನ್ನು ಅನುವಾದಿಸಿರಿ.

Translate the following passage.

सोऽपि सुमन्त्रवचनाच्छान्ताधिः शान्ताकुटुम्बिनं सम्बन्धिनं मुनिमानीय वसिष्ठादिष्टमश्वमेधाध्वरं सरयूरोधसि विधाय तत्र पुत्रीयमिष्टिं विधिवत् कर्तुमारभत ।

अथवा

किन्तु सरसिजासनशासनमप्यमोघीकुर्वन्नुर्वीतले पुत्रीयतः सुत्रामामित्रस्य दशरथस्य मनोरथमपि पूरयितुमादृतमानुषवेषः सन्नाहमेव तं हनिष्यामीति व्याहृत्यान्तरधात् ।

IV. **द्वयोः** वाक्ययोः ससन्दर्भं विवृणुत । (2×4=8)

ಎರಡು ವಾಕ್ಯಗಳನ್ನು ಸಂದರ್ಭಸಹಿತ ವಿವರಿಸಿರಿ.

Explain with reference to context **any two** of the sentences.

1) चम्पूप्रबन्धरचनां रसना मदीया ।
2) छन्दोमयीं काचिदेवं निःससार सरस्वती ।
3) त्रिदशपरिषत्कालमेघं ददर्श ।
4) पवमानाः परिस्पन्दितुमपि प्रभवो न भवन्ति ।

V. **द्वयोः** लघुटिप्पणीं लिखत । (2×2½=5)

ಎರಡನ್ನು ಕುರಿತು ಲಘು ಟಿಪ್ಪಣಿಯನ್ನು ಬರೆಯಿರಿ.

Write short notes on **any two** of the following.

1) चम्पूभारतम्
2) नारायणः
3) रावणः
4) ताटका

VI. **संस्कृत** भाषया उत्तराणि लिखत ।

a) दोषान् परिहरत (**पञ्चानाम्** एव)। (5×1=5)

1) अग्निं स्वाहा ।
2) अहं भोजनं खादति ।
3) जलस्य विना मत्स्या: न जीवन्ति ।
4) शालां बहि: उपवनं अस्ति ।
5) चोरेण भयं भवति ।
6) भास्करं नम: ।
7) सीता रामस्य सह वनं गच्छति ।
8) रामं स्वस्ति ।

b) **संस्कृत**भाषया वाक्यं रचयत (**पञ्चानाम्** एव)। (5×1=5)

1) गच्छामि।
2) अपठत् ।
3) आगत्य ।
4) यदा-तदा ।
5) बहि: ।
6) बालका: ।
7) कुत्र ।
8) इदानीम् ।

VII. **संस्कृत** भाषया अनुवदत । (1×5=5)

ಕುಂತಿಯು ಕುಂತೀಭೋಜನ ಸಾಕು ಮಗಳು. ಇವಳ ನಿಜವಾದ ತಂದೆ ಶೂರಸೇನ. ತಾಯಿ ಮಾರಿಷಾ. ಇವಳಿಗೆ ಪೃಥಾ ಎಂಬ ಹೆಸರನ್ನು ತಂದೆಯು ಇಟ್ಟಿರುತ್ತಾರೆ. ಸಾಕು ತಂದೆಯ ಹೆಸರಿನಿಂದ ಕರೆಯಲ್ಪಟ್ಟ ಇವಳು ಕುಂತಿ ಎಂದೇ ಪ್ರಸಿದ್ಧಳಾದಳು. ಇವಳು ಮುಂದೆ ಹಸ್ತಿನಾವತಿಯ ರಾಜನಾದ ಪಾಂಡುರಾಜನನ್ನು ವಿವಾಹವಾಗಿ ಶ್ರೇಷ್ಠರಾದ ಧರ್ಮರಾಯ, ಭೀಮಸೇನ ಮತ್ತು ಅರ್ಜುನರನ್ನು ಮಕ್ಕಳಾಗಿ ಪಡೆದಳು.

Kunthi was the adopted daughter of Kunthibhoja. Her real father was Shurasena and mother was Marisha. Her father named her Pritha. But she was called by her adopted father's name and became famous as Kunthi. Later she mariied the King of Hasthinavathi, Pandu, and had Dharmaraja, Bheemasena and Arjuna as sons.

---